## 1.3.1 $Q_lM$ संस्था, संस्कृतसाहित्ये शास्त्रपरम्परायां च प्रतिफलितान् स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राधिगम-प्रणालीसहितसमसामयिकसमस्याविषयकान् सर्वत्रानुस्यूतांशान् पाठ्यचर्यायां समन्वयति।

सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य द्वाविंशतिविभागेषु शास्त्र सम्बद्धविषयाः संस्कृतभाषामाध्यमेन पाठ्यन्ते। तेषां परीक्षाऽपि संस्कृत भाषया सञ्जायते। अत्र शास्त्रिकक्षायां आचार्यकक्षायां डिप्लोमाकक्षायां स्नातक/परास्नातकप्रभृतिषु शास्त्रसम्बद्धपाठ्यक्रमाः संस्कृत भाषायां निर्मिता सन्ति। तन्त्र संकायक्रमे केचन प्रखिभूताः पाठ्यक्रमाः आरेखमाध्यमे न सौकर्याय प्रदश्यर्न्ते-

**सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य**

| क्र0 सं0 | **वेदवेदाङ्गसंकायः** | **साहित्यसंस्कृतिसंकायः** | **श्रमणविद्यासंकायः** | **दर्शनसंकायः** | **आधुनिका भाषा एवं भाषाविज्ञानम्** |
|---|---|---|---|---|---|
| | वेदः ज्यौतिषम्<br>व्याकरणम्<br>धर्मशास्त्रम् | 1. साहित्यः<br>2. पुराणम्<br>3. राजशास्त्रम् , अर्थशास्त्रस्य<br>4. संगीतडिप्लोमा | 1. पालिः एवं थेरवादः<br>2. बौद्धदर्शनम्<br>3. जैनदर्शनम्<br>4. संस्कृतविद्या<br>5. प्राकृतम् | 1. वेदांत<br>2. न्यायः<br>3. तुलनात्मक धर्मः<br>4. मीमांसा<br>5. सांख्ययोग तन्त्रागमः | 1. आधुनिक विद्याः |

एवं आहत्य द्विसप्ततिपाठ्यक्रमेषु षष्टिपाठ्यक्रमाः शास्त्र सम्बद्धाः वर्तन्ते। इमे खलु पाठ्यक्रमाः शास्त्रि-आचार्यकक्षासु छात्रौः स्वेच्छया पाठनाम स्वीक्रियन्ते। अत्र खलु विषयान् छात्राः अनिवार्यरूपेण पठन्ति, गौणेषु विषयेषु छात्राः स्वरूच्या वैकल्पिकपद्धत्या निषयचयने कुर्वन्ति। एतेषां सर्वेषां पाठ्यक्रमाणां प्रश्नपत्राणि च संस्कृतभाषायामेव निर्मीयन्ते।

शास्त्रिकक्षायां शास्त्रसम्बधतेराक्षि हिन्दी-आँग्ल प्रभृतीनि भाषापत्राणि तासु-तासु निर्धारितासु भाषासु निर्णीयन्ते। तेषां पाठ्यक्रम पठन-पाठनक्रमाच तथा निर्धारितया भाषया छात्राध्यापकेन क्रियते।

शास्त्रस्य अवयवभूतत्वेन पालिप्राकृत थेरवाद विषयाः अङ्गीक्रियन्ते। तन्त्र तत्र संस्कृत भाषायाः सम्बद्धत्वात् विशेषप्रभावाच्य तेषां पठनपाठन प्रश्नपत्र निर्माण च संस्कृत/पालि/प्राकृत भाषामाध्यमेन सम्पाद्यते।

संस्कृतशास्त्रीयग्रन्थेषु च अन्तर्विषयिणीं पद्धतिमनुसृत्य आधुनिक विषयाणां यथा इतिहास- भौतिकविज्ञानम् गणितय-विज्ञानानि, राजनीतिशास्त्रम्, शिक्षाशास्त्रम्, समाजशास्त्रं मनोविज्ञान, मानवव्यवहारशास्त्र, अर्थशास्त्रम्, प्रबन्धशास्त्रम्, संगणकीयं विज्ञानम्, धातुविज्ञानम्, पर्यावरणविज्ञानम्, मनोविज्ञानम्, जीवविज्ञानम्, इत्येते प्रभृताः विषयाः सम्बद्धतया सन्निहितास्सन्ति। शास्त्रिस्तरे निर्धारितेषु अनिवार्य पाठ्यक्रमेषु निर्धारिते मेघदूते पर्यावरणसम्बन्धिनो विषयाः प्राकृतिकचिन्तनसामग्रश्च गुम्फिताः सन्ति। तत्र च भारतीयसंस्कृतिः इति द्वितीये प्रश्नपत्रे लौकिकविषयाणां प्रतिपादनपूर्वक छात्रेम्यो सामाजिकं स्परूपं पाठ्यते। अनुवादपद्धत्या च विविधानां भाषाणां वैज्ञानिकपक्षाणां स्परूपविमर्शनं विधाय अनुवादादिषु प्रकल्पेषु छात्राणं प्रतिभायाः दृढीकरणं पाठ्यक्रमेण विधीयते। वर्णव्यवस्थायाः विविधपक्षाणां शास्त्रीयस्वरूपेण सह तस्य सामाजिकं स्परूपं किञ्च ऐतिहासिकदृष्ट्या महाकाव्यानां रामायाणमहाभारतादीनां विश्वकोषत्वेन ख्यापकत्वात् सर्वेषां आधुनिकविषयाणां समन्वयात्मकं अध्ययनमत्र पाठ्यक्रमे विधीयते। भारतीयज्ञान विज्ञानशाखासु शास्त्रीयानां महाकाव्यानां किं महत्त्वमिति प्रतिपादयता पाठ्यक्रमेण छात्राणां सर्वविधाः विकासः अभिहितो विद्यते। धर्मशास्त्रे मनुस्मृतिद्वारा समाजशास्त्रं, न्यायशास्त्रे प्रमाणादीनां पदार्थानां च विवेचनेन भौतिक विज्ञान विषयाणां परमाणुब्रह्माण्डादीनां विश्लेषणं ज्योतिषशास्त्रे च गणित फलितसिद्धान्त पाठ्यक्रमेषु आधुनिकविज्ञानस्य सर्वेषां आविषकाराणां मूलत्वं कथं वैदिकवाङ्यमये निहितमिति पाठ्यचर्यायां सन्निविषटो विद्यते। यथा भास्करप्रणीता सिद्धान्तशिरोमणिः छात्रान् खगोलीयं गणितं भौतिकं रासायनिकञ्च विज्ञानं बोधयति। बराहमिहिररचिता बृहत्संहिता पर्यावरण-धातु-जीवविज्ञाननां कोषरूपा विद्यते। होरास्कन्धेच

चिकित्सा-मनोविज्ञान पक्षाणामालम्बनं पाठ्यक्रमे कृतं विद्यते। वैदिकविषयाणां पाठ्यक्रमे च संहितादिग्रन्थेषु मूलयपेण वैदिकविज्ञानं बोध्यते तथैव आख्यकगृह्यसूत्रादिग्रन्थेषु मानवव्यवहारशास्त्रमभिलक्ष्य सर्वेऽपि विषयाः सान्निविष्टाः सन्ति। कोश-निरूक्तादिमाध्यमेन आधुनिकभाषाविज्ञानेन संगणकेन च संस्कृतभाषायाः कथं प्रायोगिकदृष्ट्या समन्वयः भवेदित्यपि पाठ्यचर्यायाः अनिवार्यविषयाः सन्ति। कुण्डमण्डपसिद्धि, वेधशालाविज्ञानादि पाठ्यांशमाध्यमेन पारम्परिका छात्रा साक्षात्तया आधुनिकविषयैः सह सम्पृक्ताः भवन्ति। पाणिनीयशिक्षा-याज्ञवल्क्यशिक्षा-नारदीयशिक्षादि ग्रन्थेम्यः आधुनिक शिक्षाशास्त्रस्य ये खलु नियमकाः बिन्दवः सन्ति, तेषां स्फोरणं छात्रेषु विधीयते। साहित्यशास्त्रे च पाठ्यक्रमे महाकाव्य- दीनां माध्यमेन लोककलानां परिपोषणं पुनश्च नाटकादीनाभभिमञ्चनेन छात्रेषु अभिनयकौशल विकासः पाठ्यक्रमेन सम्पाद्यते। कादम्बरी- मृच्छकटिकम् – शिशुपालवधम् इति शास्त्रिकक्षायां निर्धारितैः पाठ्यक्रमांशैः समाजशास्त्र-राजनीतिशास्त्र- मानवव्यवहारशास्त्र-प्रबन्धनादिविषये च दक्षता छात्रेषु उपपाद्यते।

तुलनात्मकदृष्ट्या च पाठ्यक्रमेषु प्राच्यपाश्चातयमनोविज्ञानम् , योगदर्शनस्य विविधः सैद्धान्तिकाः प्रयोगिकाश्च पक्षाः, तुलनात्मकदर्शनद्वारा सर्वेषां प्राचीनदर्शनैः सह अर्वाचीनानां दर्शनानां दृष्टिरपि छात्रेभ्यः प्रदीयते। ज्योतिषविभागे तु स्नातक स्नातकोत्तरेषु सर्वेष पाठ्यक्रमेषु विशिष्य सिद्धन्ते गणिते च आधुनिकगणितस्य स्नातक-स्नातकोत्तरसभकक्षीया अध्ययनाध्यापन पाठ्यचर्या विद्यते। तत्र न केवलं ग्रन्थानां पंक्तिशः उध्ययने अपि प्रयोगिकदृष्ट्यापि पारम्परिकविषयाणां दक्षता छात्रेषु सम्पाद्यते। तत्र संगणक द्वारा भाषाविज्ञानस्य विषयाणां व्याकरणशास्त्रसाहाप्येन, यन्त्रप्रयोगयरम्परायाः वेधशाला यन्त्रालय द्वारा अभियान्त्रिकीपद्धोः रङ्गमञ्चाभिनयद्वारा कलाकौशलविकासाय पाठ्यक्रमः संकल्पबद्धो विद्यते। पाठ्यप्रक्रियायामपि PPT, Projector, Slide इत्येतेषां आधुनिकानां यन्त्राणां अनुप्रयोगः छात्रै अध्यापकैश्च क्रियते।

इतोप्यग्रे तु धर्मदर्शनाविभागे तु यहूदी-ईसाई-इस्लामादीन धर्मविषयकं चिन्तनञ्च छात्रेभ्यो विज्ञाप्य तेषां मनसि सर्वधर्मसद्भावनायाः विकासः पाठ्यक्रमस्य लक्ष्य विद्यते। अथ प्राचीनराजशास्त्रार्थशास्त्र विषयकेषु पाठ्यक्रमेषु वैदिककालादरम्य अद्यावधि यावत् सर्वेषां प्रबन्घतन्त्राणां राजनीतिनियामकानां अर्थशास्त्रीयसिद्धान्तानां च अध्ययनाध्यापनं कौटिलीयार्थशास्त्रम्ः समारभ्य वर्तभानकालिकानां साहित्यानां अध्यापनेन छात्राः दक्षाः भवन्ति।

एतदतिरिच्यापि विश्वविद्यालयस्य पाठ्यक्रमाः परस्परं परम्परां परिरक्षयन्तः आधुनिकविषयान् अदि द्योतयन्ति। यथा हि आचार्यस्तरेषु पाठ्यक्रमेषु योगदर्शने निबद्धानां पाठ्यंशानां प्रयोगदृष्ट्या महन्महत्वं वरीवर्ति। वास्तुशास्त्रीयग्रन्थेषु च प्रकृतिचिन्तनम्, अभियांत्रिकीचिन्तम्, मनोविज्ञानादिकाः विषयाः वर्तन्त एवं। संस्कृतशास्त्रेषु स्त्रीपुरूषयोः सन्तुलनविषये आचारविचारव्यवहारकर्त्तव्यादि विषये च सर्वेषुपाठ्यक्रमेषु अभिनिवेशः विद्यते। कर्मकाण्ड-पौरोहित्यादिपाठ्यक्रमे च सद्धिान्त प्रयोगयोः साहचर्यता विद्यते।

विश्वविद्यालय द्वारा दीनदयालउपाध्याय कौशलकेन्द्र पक्षतःअपि प्राचीनशास्त्रीयविषयैः यह आधुनिकविषयाणां समावेशेम आन्तरिकसज्जा- भाषादक्षता- कर्मकाण्ड ज्योतिषवास्तुशास्त्रीय पाठ्यक्रमाः सर्वसाधरणेभ्यः जिज्ञासुभ्यः प्रदीयन्ते। ज्योतिषविभागद्वारापि पाठ्यक्रमाः प्रस्ताविताः सन्ति।

आधुनिकभाषा एवं भाषाविज्ञान संकायान्तर्गते शिक्षाशास्त्रिपाठ्यकमे संस्कृतसम्बद्धाः ग्रन्थाः अङ्गीकृताः सन्ति। तेषामपि प्रश्नपत्राणि संस्कृतभाषामाध्यमेन निर्मीयन्ते पाठ्यन्ते च। यद्यपि शिक्षाशास्त्रिपाठ्यके संस्कृतभिभानि प्रश्नपत्राणि सम्बद्धभाषामाध्यमेन निर्मीयन्ते पाठ्ययन्ते च। शिक्षाशास्त्रि-पाठ्यक्रमे संस्कृतसम्बद्धोपाधिधरिणः छात्रा प्रवेशमहर्न्ति।

शास्त्रिप्रथमवर्षे मुख्य विषयेषु (वेद ज्योतिष-व्याकरणषुमृतिषु) त्रीणि प्रश्नपत्राणि संस्कृतमाध्येन पुमश्च द्वे पत्रे क्रमशः भाषा-दर्शन साहित्यादि प्रभागेश्य संस्कृतमाध्यमेन अध्याप्यन्ते। तथोः अध्ययनाध्यापन परीक्षा दिकं सर्वमपि मानकसरल संस्कृतमाध्यमेन सम्पाद्यते।

विश्वविद्यालयस्य सर्वेषु विभागेषु विद्यावारिधि (PHD) कार्यक्रमान्तर्गते आधुनिकं विषयं संकलस्य शास्त्रेषु अनुसंधान कार्य विश्वविद्यालयेन सम्पाद्यते।

शोधपाठ्यक्रमे शोधषाण्मासिकप्रशिक्षण पाठ्यक्रमे मुख्यत्वेन प्रशिक्षकाः संस्कृतमाध्यमेन शोधछात्रान् प्रशिक्षयन्ति। तथा च तेषां परीक्षायाः प्रश्नपत्राण्यपि संस्कृतभाषाया भवन्ति। शोध प्रवेश परीक्षायाः प्रश्नपत्राण्यपि संस्कृतभाषायां भवन्ति।

तत्र पाठ्यक्रमः द्विधा विभक्तः

(1)निदर्शिका- भागः-4 खण्ड

आचार्य- विद्यावारिधि वाचस्पति-परीक्षाणाम् कुल पृ.सं. 102

आचार्य प्रथम खण्डः-1-37

आर्चार्यद्वितीयखण्डः- 38-102

(2)निर्दीशका-भागः-4 खण्डः-3

शास्त्रिपरीक्षायाः पाठ्यक्रमः पृ.सं. 174

शास्त्री प्रथम खण्डः - पृ.सं. 01-56

शास्त्री द्वितीय खण्ड5ः - पृ.सं. 57-111

शास्त्रीय तृतीय खण्डः - पृ.सं. 112-174

इत्थं समग्रसंस्कृतसम्बद्धशास्त्राणि संस्कृतभाषायां पाठ्यक्रमे निबद्धानि सन्ति। विश्वविद्यालये च पाठ्यक्रमसंरचनायां शास्त्राध्यापने अनुसन्धाने सर्वत्र संस्कृतमयं वातावरणं विद्यते।

**स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति**